# પુરુષ સૂક્તમ (ઋગ્વેદ)

ૐ સહસ્રશીર્ષા પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત ।
સ ભૂમિં વિશ્વતો વૃત્વા અત્યતિષ્ઠદ્દશાઙ્ગુળમ ॥ 1 ॥

પુરુષ એવેદં સર્વં યદ્ભૂતં યચ્ચ ભવ્યમ ।
ઉતામૃતત્વસ્યેશાનો યદન્નેનાતિરોહતિ ॥ 2 ॥

એતાવાનસ્ય મહિમાટતો જ્યાયાશ્ચ પૂરુષઃ ।
પાદોટસ્ય વિશ્વા ભૂતાનિ ત્રિપાદસ્યામૃતં દિવિ ॥ 3 ॥

ત્રિપાદૂર્ધ્વ ઉદૈત્પુરુષઃ પાદોટસ્યેહાટટભવાત્પુનઃ ।
તતો વિશ્વઙ્વ્યક્રામત સાશનાનશને અભિ ॥ 4 ॥

તસ્માદ્વિરાડજાયત વિરાજો અધિ પૂરુષઃ ।
સ જાતો અત્યરિચ્યત પશ્ચાદ્ભૂમિમથો પુરઃ ॥ 5 ॥

યત્પુરુષેણ હવિષા દેવા યજ્ઞમતન્વત ।
વસન્તો અસ્યાસીદાજ્યં ગ્રીષ્મ ઈધ્મશ્શરદ્ધવિઃ ॥ 6 ॥

તં યજ્ઞં બર્હિષિ પ્રૌક્ષન પુરુષં જાતમગ્રતઃ ।
તેન દેવા અયજન્તઃ સાધ્યા ઋષયશ્ચ યે ॥ 7 ॥

તસ્માત યજ્ઞાત્સર્વહુતઃ સંભૃતં પૃષદાજ્યમ ।
પશૂંતાંશ્ચક્રે વાયવ્યાન આરણ્યાન ગ્રામ્યાશ્ચ યે ॥ 8 ॥

તસ્માત યજ્ઞાત્સર્વહુતઃ ઋચઃ સામાનિ જજ્ઞિરે ।
છન્દાંસિ જજ્ઞિરે ત્સમાત યજુસ્તસ્માદજાયત ॥ 9 ॥

તસ્માદશ્વા અજાયન્તઃ યે કે ચોભયાદતઃ ।
ગાવો હ જજ્ઞિરે તસ્માજ્જાતા અજાવયઃ ॥ 10 ॥

યત્પુરુષં વ્યદધુ: કતિધા વ્યકલ્પયન ।
મુખં કિમસ્ય કૌ બાહૂ કાવૂરૂ પાદાવુચ્યેતે ॥ 11 ॥

બ્રાહ્મણોઽસ્ય મુખમાસીત બાહૂ રાજન્ય: કૃત: ।
ઊરૂ તદસ્ય યદ્વૈશ્ય: પદ્ભ્યાં શૂદ્રો અજાયત ॥ 12 ॥

ચન્દ્રમા મનસો જાત: ચક્ષો: સૂર્યો અજાયત ।
મુખાદિન્દ્રશ્ચાગ્નિશ્ચ પ્રાણાદ્વાયુરજાયત ॥ 13 ॥

નાભ્યા આસીદન્તરિક્ષં શીર્ષ્ણૌ દ્યૌ: સમવર્તત ।
પદ્ભ્યાં ભૂમિર્દિશ: શ્રોત્રાત તથા લોકાગં અકલ્પયન ॥ 14 ॥

સપ્તાસ્યાસન પરિધય: ત્રિ: સપ્ત સમિધ: કૃતા: ।
દેવા યદ્યજ્ઞં તન્વાના: અબધ્નન્પુરુષં પશુમ ॥ 15 ॥

યજ્ઞેન યજ્ઞમયન્ત દેવાસ્તાનિ ધર્માણિ પ્રથમાન્યાસન ।
તે હ નાકં મહિમાન: સચન્તે યત્ર પૂર્વે સાધ્યા: સન્તિ દેવા: ॥ 16 ॥

ૐ શાન્તિ: શાન્તિ: શાન્તિ: ॥